# Devaih Krita Ambika Stuti

# देवैः कृता अम्बिकास्तुतिः

## Document Information

Text title : Devaih Krita Ambika Stuti

File name : ambikAstutiHdevaiHkRRitA.itx

Category : devii, shivarahasya, stuti, devI

Location : doc_devii

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 14 | 247.2-277.1||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# देवैः कृता अम्बिकास्तुतिः

देवा ऊचुः -
नमो देव्यै नमो देव्यै नमो देव्यै नमो नमः ॥ २४७॥

नमो नमो जगद्धत्र्यै जगद्धात्र्यै नमो नमः ।
नमो नमस्ते कल्याण्यै मङ्गलायै नमो नमः ॥ २४८॥

नमो मातर्नमो मातर्नमो मातर्नमो नमः ।
नमो मातर्नमो मातर्नमो मातर्नमो नमः ॥ २४९॥

नमो नमस्ते शर्वाण्यै सुखदायै नमो नमः ।
नमो नमस्ते भद्रायै शोभनायै नमो नमः ॥ २५०॥

नमो नमस्ते शुद्धायै शाम्भव्यै ते नमो नमः ।
नमस्ते परमेश्वर्यै परमायै नमो नमः ॥ २५१॥

नमस्ते भुक्तिदायिन्यै मुक्तिदायै नमो नमः ।
नमस्ते विश्वरूपिण्यै विश्वमात्रे नमो नमः ॥ २५२॥

नमस्ते लिङ्गरूपिण्यै भूतिदायै नमो नमः ।
नमः सन्तुष्टचित्तायै पुष्टिदायै नमो नमः ॥ २५३॥

नमो नमोऽन्नपूर्णायै सुवर्णायै नमो नमः ।
नमश्चन्द्रावतंसायै सर्वेश्वर्यै नमो नमः ॥ २५४॥

नमस्ते चन्द्रसूर्याग्निप्रतिमायै शिवप्रिये ।
नमस्ते भाग्यदायिन्यै भोगदायै नमो नमः ॥ २५५॥

नमस्ते शान्तिदायिन्यै शमदायै नमो नमः ।
नमस्ते पुण्यरूपिण्यै पुण्यदायै नमो नमः ॥ २५६॥

नमस्ते कीर्तिरूपिण्यै कीर्तिदायै नमो नमः ।
नमस्ते धर्मरूपिण्यै धर्मदायै नमो नमः ॥ २५७॥

नमस्ते बुद्धिरूपिण्यै बुद्धिदायै नमो नमः ।
या त्वं विद्यास्वरूपेण विद्या मद्धृदये स्थिता ॥ २५८॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं कीर्तिस्वरूपेण कीर्तिमद्धृदये स्थिता ॥ २५९॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं पुण्यस्वरूपेण पुण्यवद्धृदये स्थिता ॥ २६०॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं धर्मस्वरूपेण धर्मवद्धृदये स्थिता ॥ २६१॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं शान्तिस्वरूपेण शान्तिमद्धृदये स्थिता ॥ २६२॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं मदस्वरूपेण मदवद्धृदये स्थता ॥ २६३॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं दयास्वरूपेण दयावद्धृदये स्थिता ॥ २६४॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं ज्ञानस्वरूपेण ज्ञानिनां हृदये स्थिता ॥ २६५॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं पुष्टिस्वरूपेण पुष्टिमद्धृदये स्थिता ॥ २६६॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं तुष्टिस्वरूपेण तुष्टिमद्धृदये ॥ २६७॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं शुभस्वरूपेण शुभवद्धृदि संस्थिता ॥ २६८॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं योगस्वरूपेण योगिनां हृदये स्थिता ॥ २६९॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं सिद्धिस्वरूपेण सिद्धिमद्धृदि संस्थिता ॥ २७०॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं कल्याणरूपेण भक्तकल्याणदायिनी ॥ २७१॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं ध्यानस्वरूपेण भक्तानां ध्यानदायिनी ॥ २७२॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
यात्वमैश्वर्यरूपेण भक्तैश्वर्यप्रदायिनी ॥ २७३॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं रक्षणरूपेण भक्तरक्षणदायिनी ॥ २७४॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वमारोग्यरूपेण भक्तारोग्यप्रदायिनी ॥ २७५॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।
या त्वं सुखस्वरूपेण भक्तनां सुखदायिनी ॥ २७६॥

तस्यै शिवाङ्गभागिन्यै नमस्तुभ्यं नमो नमः ।

॥ इति शिवरहस्यान्तर्गते देवैः कृता अम्बिकास्तुतिः सम्पूर्णा ॥

- ॥ श्रीशिवरहस्यम् उग्राख्यः सप्तमांशः । अध्यायः १४ । २४७।२-२७७.१ ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 14 . 247.2-277.1 ..

Notes:
As Ambikā अम्बिका arrives at the site of Dakṣa Yajña दक्ष यज्ञ, the Devāḥ देवाः (including Viṣṇu विष्णु, Brahma ब्रह्मा, Yakṣa-s यक्षाः, Pannaga-s पन्नगाः, Gandharva-s गन्धर्वाः, Siddha-s सिद्धाः, Vidyādhara-s विद्याधराः) eulogize Her with all humility and reverence.

Encoded and proofread by Ruma Dewan

*Devaih Krita Ambika Stuti*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*